## ई३ चाक्रवर्मणस्य । (१३०/९९)

[1]ई३कारः प्लुतोऽचि परतः चाक्रवर्मणस्याचार्यस्य मतेन अप्लुतवद् भवति । अस्तु हीत्यब्रूताम्, अस्तु ही३ इत्यब्रूताम् । चिनु हीदम् । चिनु ही३ इदम् । चाक्रवर्मणग्रहणं विकल्पार्थम्, [2]तदुपस्थिते निवृत्त्यर्थम् अनुपस्थिते प्राप्त्यर्थम् इत्युभयत्रविभाषा[3]इयम् । ईकारादन्यत्राप्ययमप्लुतवद्भाव इष्यते । [4]वशा३ इयम्, वशेयम् ॥

## दिव उत् । (१३१/३३७)

'एङः पदान्तादति' (.६१.१०९/८६) इत्यतः पदग्रहणमनुवर्तते । दिवः इति प्रातिपदिकं गृह्यते, न धातुः, [5]सानुबन्धकत्वात् । दिवः [6]पदस्य उकारादेशो भवति । [7]दिवि कामो यस्य द्युकामः । द्युमान्[8] । विमलद्यु दिनम् । द्युभ्याम् । [9]द्युभिः । [10]निरनुबन्धकग्रहणादिह न भवति, अक्षद्यूभ्याम्, [11]अक्षद्यूभिः इति । तपरकरणम् ऊठो निवृत्त्यर्थम्, द्युभ्याम्, द्युभिः इति । अत्र हि परत्वात् ऊठ् प्राप्नोति । पदस्य इति [12]किम् ? दिवौ । दिवः ॥

## एतत्तदोः सुलोपोऽकोरनञ्समासे हलि । (१३२/१७६)

एतत्तदौ यावककारौ नञ्समासे न वर्तेते तयोर्यः सुशब्दः, कश्च तयोः सुशब्दः ? यः तदर्थेन [13]सम्बद्धः, तस्य [14]संहितायां विषये हलि परतो लोपो भवति । एष ददाति । स ददाति । एष भुङ्क्ते । स भुङ्क्ते । एतत्तदोः इति किम् ? यो ददाति । यो भुङ्क्ते । सुग्रहणं किम् ? एतौ गावौ चरतः । अकोः इति किम् ? एषको ददाति । सको ददाति । 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या. प. २१) इति [15]रूपभेदेऽपि साकच्काबेतत्तदावेव भवतः । अनञ्समासे इति किम् ? अनेषो ददाति । असो ददाति । उत्तरपदार्थप्रधानत्वान्नञ्[16]समासस्य एतत्तदोरेवात्र सम्बद्धः सुशब्दः । हलि इति किम् ? एषोऽत्र । सोऽत्र ॥

## स्यश्छन्दसि बहुलम् । (१३३/३८२६)

स्य इत्येतस्य छन्दसि[17]हलि परतः बहुलं सोर्लोपो भवति । [18]'उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि कक्ष आसनि' (ऋ. ४.४०.४) । 'एष स्य ते [19]पवत इन्द्र सोमः' (ऋ. ९.९७.४६) । न [20]च भवति, यत्र स्यो[21] निपतेत् ॥

---

1. ईकारः ड, इकारः क. 2. तदुपस्थितनिवृत्त्यर्थम् फ. 3. इयम् नास्ति ग. फ. 4. वसा इयम् वसेयम् ड, वत्सा इयम् वत्स्येयम् इत्यधिकम् क. 5. सानुबन्धकत्वात् नास्ति फ. 6. पदस्य नास्ति ग. 7. वाक्यमिदं नास्ति क. ग. फ. 8. मणिः इत्यधिकम् क. 9. द्युभिः नास्ति फ. 10. निरसम्बद्धकग्रहणात् ग. 11. अक्षद्युभिः फ. 12. एव क. ग. फ. 13. सम्बध्यते फ. 14. संहितायाम् विषये नास्ति ग. 15. स्वरूपभेदे फ. ह. 16. तत्पुरुषस्य क. 17. विषये इत्यधिकम् ग. 18. एष मुद्रितः पाठः 19. मधुमां मुद्रितः पाठः 20. च नास्ति ग. 21. निपत्यते ह, निवर्तते ग.